**Series ΣHEFG/C** **Set-4**

प्रश्न-पत्र कोड
Q.P. Code **22**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समयः : होरात्रयम्* | *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* | *अधिकतम अंक : **80***
*Time allowed : **3** hours* | *Maximum Marks : **80***

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

- Please check that this question paper contains **19** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

*

**सामान्य निर्देशाः**

- *कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **19** पृष्ठानि मुद्रितानि सन्ति ।*
- *कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **18** प्रमुखाः प्रश्नाः सन्ति ।*
- *उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।*
- *अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।*

*प्रश्नपत्रस्वरूपम् :*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति —*

| | | | |
|---|---|---|---|
| ***खण्डः 'क'*** | – | *अपठित-अवबोधनम्* | – *10 अङ्काः* |
| ***खण्डः 'ख'*** | – | *रचनात्मक-कार्यम्* | – *15 अङ्काः* |
| ***खण्डः 'ग'*** | – | *अनुप्रयुक्त-व्याकरणम्* | – *20 अङ्काः* |
| ***खण्डः 'घ'*** | – | *I. पठितावबोधनम्* | – *25 अङ्काः* |
| | | *II. संस्कृत-साहित्यस्य सामान्यपरिचयः* | – *10 अङ्काः* |

*(i)* अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

*(ii)* प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

*(iii)* प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।

*(iv)* सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

*(v)* प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

## खण्डः 'क'

## अपठित-अवबोधनम्

10 अङ्काः

## अपठित-अवबोधन

## Unseen Passage

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश को पढ़कर प्रदत्त प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit.

अतिविशालं खलु संस्कृतसाहित्यम् । अस्य कथासाहित्यम् अपि समृद्धम् अस्ति । 'पञ्चतन्त्रम्' महान् कथाग्रन्थः अस्ति । अस्य लेखकः 'विष्णुशर्मा' अस्ति । अस्य कथाः नैतिकशिक्षायुक्ताः सन्ति । पञ्चतन्त्रे पशवः पक्षिणः मानवाः च कथासु पात्राणि सन्ति । कथासु निरन्तरम् उत्सुकता वर्धते । 'महिलारोप्य' नामक नगरस्य 'अमरसिंह' इति नाम्नः भूपतेः राजनीति-ज्ञानशून्यान् चतुरः पुत्रान् शिक्षयितुम् एतद् विरचितमासीत् परं शीघ्रमेव पुस्तकमिदम् अतिप्रसिद्धं सञ्जातम् । पुरा ईरानदेशस्य राजा नौशेखाँ अस्य गुणान् उपयोगितां च निशम्य एतत् पठितुम् ऐच्छत् । अतस्तेन 'हकीमबुरजोई' नामकः सभापण्डितः भारतं प्रति प्रेषितः ! सः वर्षद्वयम् अत्र उषित्वा संस्कृतभाषां पठितवान् । पुनश्च पहलवीभाषया अस्य भाषान्तरम् अकरोत् । पञ्चतन्त्रं संस्कृतसाहित्यस्य प्रथमा एतादृशी कृतिरस्ति, यस्याः कथाः अनुवादमाध्यमेन इण्डोनेशिया-थाईलैण्ड-योरोप प्रभृति देशेषु अपि रुचिप्रदाः सञ्जाताः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *2×1=2*

(i) संस्कृतसाहित्यं कीदृशम् अस्ति ?

(ii) पञ्चतन्त्रस्य लेखकः कः ?

(iii) 'पञ्चतन्त्रम्' कीदृशः ग्रन्थः अस्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) पञ्चतन्त्रं किमर्थं विरचितम् जातम् ?

(ii) पञ्चतन्त्रस्य कया भाषया भाषान्तरं जातम् ?

(iii) पञ्चतन्त्रस्य कथाः कथम् इण्डोनेशिया-थाईलैण्ड प्रभृति देशेषु अपि रुचिप्रदाः सञ्जाताः ?

(इ) अस्य गद्यांशस्य उचितं शीर्षकं संस्कृतेन लिखत ।

इस गद्यांश का उचित शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit. *1×1=1*

(ई) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)

निर्देशानुसार उत्तर दीजिए । (केवल तीन प्रश्न)

Answer as directed. (Only three questions) *3×1=3*

(i) 'कथाग्रन्थः' इति पदस्य उचितं विशेषणपदं चिनुत –

(a) समृद्धम्

(b) प्रेषितः

(c) नैतिकशिक्षायुक्ताः

(d) महान्

(ii) 'यशः' इति पदस्य उचितं पर्यायपदं चिनुत –

(a) कृतिः

(b) कीर्तिः

(c) प्रथमा

(d) प्रसृता

(iii) 'कथासु निरन्तरम् उत्सुकता वर्धते' अत्र वाक्ये कर्तृपदं किम् ?

(a) कथासु

(b) निरन्तरम्

(c) उत्सुकता

(d) वर्धते

(iv) 'सः वर्षद्वयम् अत्र उषित्वा संस्कृतभाषां पठितवान्' अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(a) अमरसिंहाय

(b) 'हकीमबुरजोई' कृते

(c) 'नौशेखाँ' कृते

(d) विष्णुशर्मणे

## खण्डः 'ख'

## रचनात्मक-कार्यम्

## रचनात्मक-कार्य

## Writing Skills

15 अङ्काः

**2.** भवती जया । प्रधानाचार्यं प्रति चरित्रप्रमाणपत्रार्थं लिखिते पत्रे मञ्जूषा-प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत ।

तुम जया हो । प्रधानाचार्य को चरित्र-प्रमाणपत्र के लिए लिखे पत्र में मञ्जूषा में दिए गए शब्दों से रिक्त स्थान भरकर पत्र को पुनः लिखिए ।

You are Jaya. In the letter written for the character certificate to the principal, given in the box rewrite the letter by filling in the words. $10\times\frac{1}{2}=5$

(i) __________
श्रीमन्तः प्रधानाचार्यमहोदयाः,
राजकीयः प्रतिभाविकास-विद्यालयः
नवदेहली
(ii) __________

सादरं निवेद्यते यत् अस्मिन्नेव वर्षे मया द्वादशी कक्षा द्वानवतिप्रतिशताङ्कैः सह (iii) __________ कृता । सम्प्रति अहं अध्ययनाय (iv) __________ प्रवेशं ग्रहीतुम् (v) __________ । तत्र चरित्रप्रमाणपत्रस्य (vi) __________ वर्तते ।

अतोऽहं भवन्तं (vii) __________ यत् मम चरित्रप्रमाणपत्रं शीघ्रातिशीघ्रं (viii) __________ कृपां कुर्वन्तु । अहं भवताम् (ix) __________ भविष्यामि ।

धन्यवादाः ।
भवतां शिष्या
(x) __________
कक्षा द्वादशी 'अ'
अनुक्रमाङ्कः 21

**मञ्जूषा**

| |
|---|
| आवश्यकता, समुत्तीर्णा, जया, प्रदाय, सेवायाम्, मान्याः, विश्वविद्यालये, इच्छामि, प्रार्थयामि, अनुगृहीता । |

3. (क) मञ्जूषा-प्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत ।

मञ्जूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुनः लिखिए ।

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. $10\times\frac{1}{2}=5$

दाक्षिणात्ये जनपदे 'देवपुरम्' नाम (i) __________ आसीत् । तत्र नद्याः निकटे एकः विशालः (ii) __________ आसीत् । तत्र चित्रग्रीवः कपोतराजः (iii) __________ । एकदा कश्चिद् व्याधः तत्र आगच्छत् । सः वृक्षस्य (iv) __________ जालं प्रसारयति । उपरि च (v) __________ क्षिपति । तदा तण्डुलान् (vi) __________ आगताः कपोताः जाले बद्धाः अभवन् । सर्वे कपोताः मिलित्वा (vii) __________ सह उदपतन् । ते जालं नीत्वा मूषकराजस्य (viii) __________ पार्श्वे अगच्छन् । सः तेषां (ix) __________ आसीत् । हिरण्यकः जालम् (x) __________ । एवं कपोताः मुक्ताः अभवन् । विपत्तौ तु मित्रम् एव सहायः भवति ।

**मञ्जूषा**

| |
|---|
| वटवृक्षः, नगरम्, वसति स्म, अधः, तण्डुलकणान्, मित्रम्, खादितुम्, जालेन, हिरण्यकस्य, अकृन्तत् । |

**अथवा (OR)**

(ख) अधोलिखित-संवादे रिक्तस्थानानि पूरयत ।

निम्नलिखित संवाद में रिक्त स्थान भरिए ।

Fill in the blanks in the conversation. $5\times1=5$

*सरिता* — रमे ! किम् त्वं विद्यालये पाठयसि ?

*रमा* — आम् सरिते ! (i) ______________ ।

*सरिता* — शोभनम्, तत्र त्वं कं विषयं पाठयसि ?

*रमा* — (ii) ______________ ।

*सरिता* — किम् त्वं संस्कृतपुस्तकम् भास्वतीं पाठयसि ?

*रमा* — (iii) ______________ ।

*सरिता* — भास्वती कस्याः कक्षायाः पाठ्य-पुस्तकम् अस्ति ?

*रमा* — (iv) ______________ ।

*सरिता* — रमे ! किं त्वम् अभ्यासकार्यम् अपि कारयसि ?

*रमा* — (v) ______________ ।

*सरिता* — शोभनम् । अवश्यमेव त्वम् जीवने सफला शिक्षिका भविष्यसि ।

**4.** अधोलिखितवाक्येषु केषाञ्चन ***पञ्च*** वाक्यानां संस्कृतेन अनुवादं कुरुत ।
निम्नलिखित वाक्यों में से किन्हीं ***पाँच*** वाक्यों का संस्कृत में अनुवाद कीजिए ।
Translate any ***five*** sentences in Sanskrit from the following sentences. *5×1=5*

(i) श्यामा गेंद से खेलती है ।
Shyama plays with ball.

(ii) छात्र विद्यालय जाते हैं ।
The students go to school.

(iii) मोहन मित्र के साथ गाँव जाएगा ।
Mohan will go to village with friend.

(iv) मार्ग के दोनों ओर वृक्ष हैं ।
There are trees on both sides of the road.

(v) दीक्षा दूध पीती है ।
Deeksha drinks milk.

(vi) तुम सब प्रतिदिन नृत्य करती हो ।
You all dance everyday.

(vii) वीणा ने आज बगीचा देखा ।
Veena saw the garden today.

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम्

20 अङ्काः

## अनुप्रयुक्त-व्याकरण

## Applied Grammar

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलं प्रश्नषट्कम्)
निम्नलिखित वाक्यों में रेखाङ्कित पदों की सन्धि या सन्धि-विच्छेद करके लिखिए ।
(केवल छः प्रश्न)
Write sandhis or disjoin sandhis in the underlined words of the following sentences. (Only six questions) *6×1=6*

(i) यान्यस्माकं सुचरितानि तानि उपास्यानि ।

(ii) तस्याः लोभोऽत्र नास्माकम् ।

(iii) भर्त्रा सदा + एव भार्या भर्तव्या ।

(iv) भोजः + च चिरं प्रजाः पालितवान् ।

(v) कुशलान्न प्रमदितव्यम् ।

(vi) संवृत्ते किञ्चिदन्धकारे प्रतापदुर्गदौवारिकः निरीक्षमाणः आसीत् ।

(vii) सन्यासिन् ! बहूक्तम् ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नपञ्चकम्)
निम्नलिखित वाक्यों में रेखाङ्कित पदों का उचित समस्त पद अथवा विग्रह वाक्य को प्रदत्त विकल्पों में से चुनिए । (केवल पाँच प्रश्न)

In the following sentences, select the appropriate compound term or compound conflict of the underlined words from the given alternatives.
(Only five questions) *5×1=5*

(i) एका प्रयोगशाला यस्यां त्वं प्रयोगं कर्तुं शक्ष्यसि ।

(a) प्रयोगाय शाला (b) प्रयोगे शाला

(c) प्रयोगं शाला (d) प्रयोगात् शाला

(ii) परस्परमनुव्रतौ पतिपत्न्यौ <u>त्रयाणां वर्गाणां समाहारः</u> साधयतः ।

(a) वर्गत्रयम्

(b) त्रीणिवर्गं

(c) त्रिवर्गम्

(d) त्रयवर्गं

(iii) <u>शोकेन सन्तप्तः</u> मुञ्जः वह्नौ प्रवेशनं निश्चितवान् ।

(a) शोकसन्तप्तः

(b) शोकसन्तप्तौ

(c) शोकसन्तप्ताः

(d) शोकं सन्तप्तः

(iv) दौवारिकः <u>गम्भीरस्वरेण</u> अवदत् ।

(a) गम्भीरः स्वरः तेन

(b) गम्भीरम् स्वरः तेन

(c) गम्भीराः स्वरः

(d) गम्भीरः स्वरेण

(v) स एवाभिज्ञाय त्वया <u>उचितम् अनतिक्रम्य</u> व्यवहरिष्यति ।

(a) उचितमतिक्रम्य

(b) यथोचितम्

(c) यथोचितः

(d) उचितक्रान्तः

(vi) तदनु स्वयमेव कुलगुरुं पितरौ च समाजयितुं गमिष्यावः ।

(a) माता च पिता च

(b) मातुः च पितुः च

(c) मात्रा पिता

(d) पिता च माता च

(vii) धृतम् तुम्बीपात्रम् येन सः सन्यासी दृष्टः ।

(a) धृततुम्बीपात्रम्

(b) धृततुम्बीपात्रः

(c) धृततुम्बीपात्रेण

(d) धृततुम्बीपात्रे

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिप्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रेखाङ्कित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति प्रत्यय दिए हुए विकल्पों में से चुनिए । (केवल छः प्रश्न)

From the given sentences, choose the correct combination of joint or disjoint set of suffix for the underlined words. (Only six questions) *6×1=6*

(i) भर्त्रा भार्या रक्ष् + तव्यत् एव ।

(a) रक्षिता (b) रक्षतव्यः

(c) रक्षितव्या (d) रक्षितव्यम्

(ii) यस्याः शक्रसमो भर्ता मया पुत्रवती च सा ।

(a) पुत्रवत् + ङीप् (b) पुत्र + क्तिन्

(c) पुत्र + क्तवतु (d) पुत्रवत् + टाप्

(iii) आसीद् अङ्गुलीव उरगक्षता ।

(a) उरगक्षत + ङीप्

(b) उरगक्षत + टाप्

(c) उरगक्षत + तव्यत्

(d) उरगक्षत + तल्

(iv) दौवारिकः निपुणं निर् + ईक्ष् + शानच् तं पर्यचिनोत् ।

(a) निरीक्षन्

(b) निरीक्षयन्

(c) निरीक्षमाणः

(d) निरीक्षणम्

(v) तदा दा + क्त अपि राज्यं वृथा ।

(a) दत्तम्

(b) दातव्यम्

(c) दातम्

(d) दाता

(vi) हन्त ! निवेदितम् अप्रभु + त्व ।

(a) अप्रभुता (b) अप्रभुत्वम्

(c) अप्रभुत्वः (d) अप्रभुत्वा

(vii) सिद्धोऽहं बलवान् सुखी ।

(a) बल + शानच् (b) बल + शतृ

(c) बल + मतुप् (d) बल + क्तवतु

**8.** समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)

उपयुक्त उपपद-विभक्ति रूप को चुनिए । (केवल तीन प्रश्न)

Choose the appropriate subordinate clause form. (Only three questions) *3×1=3*

(i) _________ न प्रमदितव्यम् ।

(a) सत्यात् (b) सत्यस्य

(c) सत्याय (d) सत्येन

(ii) शिववीरस्य ________ वयं शिरसा वहामः ।

(a) आज्ञाम् (b) आज्ञया

(c) आज्ञा (d) आज्ञायै

(iii) आकारसदृशप्रज्ञः _________ सदृशागमः ।

(a) प्रज्ञा (b) प्रज्ञया

(c) प्रज्ञायाः (d) प्रज्ञाम्

(iv) हा धिक् ! _________ अविज्ञायोपालभसे ।

(a) मया (b) अस्मभ्यम्

(c) अस्मान् (d) अस्माकम्

## खण्डः 'घ'

## (I) पठितावबोधनम्

25 अङ्काः

## पठित-अवबोधन

## Reading Comprehension

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following prose passage and answer the questions based on them in Sanskrit. *5*

वेदमनूच्य आचार्यः अन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्याय – प्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) वेदमनूच्य आचार्यः कम् अनुशास्ति ?

(ii) कं चर ?

(iii) कस्मात् मा प्रमदः ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) आचार्याय प्रियं धनम् आहृत्य किं न कुरु ?

(ii) त्वया अस्माकं कानि उपास्यानि ?

(iii) कीदृशानि कर्माणि सेवितव्यानि ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'आचार्यः' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'दुश्चरितानि' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'अनवद्यानि' विशेषणपदस्य विशेष्यपदं किं प्रयुक्तम् ?

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following poetry and answer the questions based on them in Sanskrit. *5*

दीर्घप्रयासेन कृतं हि वस्तु,
निमेषमात्रेण भजेद् विनाशम् ।
कर्तुं कुलालस्य तु वर्षमेकं,
भेत्तुं हि दण्डस्य मुहूर्तमात्रम् ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) किमपि वस्तु कथं कृतं भवति ?

(ii) वस्तु निमेषमात्रेण कं भजेत् ?

(iii) कस्य भेत्तुं मूहूर्तमात्रम् अलम् ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) किमपि वस्तु कियता कालेन विनाशं भजेत् ?

(ii) कुलालस्य वस्तु कतिवर्षं निर्मितं भवति ?

(iii) दण्डस्य कियत्कालं भेत्तुम् अलम् ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'प्रयत्नेन' इति पदस्य कृते किं समानार्थकं पदं प्रयुक्तम् ?

(ii) 'वस्तु' इति कर्तृपदस्य क्रियापदं किम् ?

(iii) 'कृतं वस्तु' इति अनयोः पदयोः विशेषणपदं किम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following part of a drama and answer the questions based on it in Sanskrit. *5*

*कुण्डला* — गृहस्थाश्रमं प्रविश्य स्वशिशूनां चरित्रनिर्माणं मातुराधीनम् । तत्र का विचारणा ?

*मदालसा* — यथाहं पश्यामि पुरुषः भार्यायां स्वाधिपत्यं स्थापयति । द्रौपदीं स्वीयां सम्पत्तिं मन्यमानः युधिष्ठिरः तां द्यूते हारितवान् यथा सा निर्जीवं वस्तु आसीत् ।

*कुण्डला* — निर्जीवं तु नासीत् परं युधिष्ठिरस्य एषा एव चिन्तनसरणिः आसीत् इति प्रतीयते ।

*मदालसा* — हरिश्चन्द्रः स्वपत्नीं शैव्यां, पुत्रं रोहितं च जनसङ्कुले आपणे विक्रीतवान् । नास्ति मे मनोरथः ईदृशं पत्नीपदमङ्गीकर्तुम् ।

*कुण्डला* — कटुसत्यं खल्वेतत् । परं सखि ! अस्मिन् संसारे विभिन्नप्रकृतिकाः पुरुषाः वसन्ति । स्वप्रकृत्यनुकूलः वरः अपि प्राप्यते । त्वं तु नवनवोन्मेष – शालिन्या प्रतिभया विहितैः नूतनैः प्रयोगैः अस्मान् सर्वान् विस्मापयसि । गृहस्थाश्रमोऽपि एका प्रयोगशाला यस्यां त्वं स्वज्ञानविज्ञानयोः प्रयोगं कर्तुं शक्ष्यसि ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) स्वशिशूनां किं मातुराधीनम् ?

(ii) कः भार्यायां स्वाधिपत्यं स्थापयति ?

(iii) अस्मिन् संसारे कीदृशाः पुरुषाः वसन्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) युधिष्ठिरः कां द्यूते हारितवान् ?

(ii) हरिश्चन्द्रः कान् आपणे विक्रीतवान् ?

(iii) त्वं कीदृशैः प्रयोगैः अस्मान् विस्मापयसि ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)

Answer as directed. (Only two questions) *2×1=2*

(i) 'वस्तु' इति पदस्य विशेषणपदं अत्र किं प्रयुक्तम् ?

(ii) 'विक्रीतवान्' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'प्राचीनैः' इति पदस्य विलोमपदं किम् ?

**12.** (क) अधोलिखितपद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत ।

निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुनः लिखिए ।

Rewrite the gist of the following verse by filling it with the help of the words given in the box. *3×1=3*

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।

आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।।

**भावार्थ :**

यथा सृष्टौ (i) __________ वेदानाम् प्रथमः अभवत् तथैव विदुषाम् (ii) __________ राज्ञाम् प्रथमः वैवस्वतः (iii) __________ नाम राजा अभवत् ।

**मञ्जूषा**

| |
|---|
| ओङ्कारः, मनुः, सम्माननीयः |

**अथवा (OR)**

(ख) प्रदत्तभावार्थ-त्रयात् शुद्धं भावार्थं चित्वा लिखत ।

दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए ।

Write the correct essence from three essences of the following each part. *3×1=3*

(i) 'इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।'

(a) इदं वस्तु मम वर्तते अन्यदपि मम एव स्यात् ।

(b) इदमस्ति इति चिन्तयित्वा कोऽपि सन्तुष्टः न ।

(c) मम पार्श्वे एतन्मात्रं धनमस्ति अहम् पुनः अत्यधिकमपि धनम् प्राप्स्यामि ।

(ii) 'नैकेनापि समं गता वसुमती ।'

(a) केनापि सार्धं वसुमती गता ।

(b) जीवनान्ते न केनापि सह इयं भोग्या धरा गतास्ति ।

(c) एकेन सह वसुमती गता ।

(iii) 'निजपरिचयम् अददेव आयाति इति आक्रुश्यते ।'

(a) गौरसिंहः निजपरिचयं न दत्वा तत्र दुर्गे प्रविशति अतः दौवारिकः क्रुध्यति ।

(b) आत्मपरिचयं दत्त्वा आयाति अतः आक्रुश्यते ।

(c) स्वपरिचयं ददाति आयाति च अतः न क्रुध्यते ।

**13.** अधोलिखितश्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि पूरयत ।

निम्नलिखित श्लोक के अन्वय में रिक्तस्थान भरिए ।

The prose-order rendering of the following verse is given, fill in the blanks. *3×1=3*

'ज्ञाने मौनं क्षमा शक्तौ,
त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्,
तस्य सप्रसवा इव ।।'

**अन्वय :**

ज्ञाने (i) __________ शक्तौ क्षमा

त्यागे (ii) __________ गुणानुबन्धित्वात्

तस्य गुणाः (iii) __________ इव (सन्ति)

**14.** 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत ।

'क' स्तम्भ के वाक्यांश का 'ख' स्तम्भ के वाक्यांश के साथ मिलान कीजिए ।

Match the sentences of column 'क' with the suitable sentences of column 'ख'. $4\times\frac{1}{2}=2$

| | *'क' स्तम्भ* | | *'ख' स्तम्भ* |
|---|---|---|---|
| (i) | त्याज्यो दुष्टः प्रियोऽप्यासीद् | (अ) | अनन्तपारो गभीरश्च । |
| (ii) | यस्याः शक्रसमो भर्ता | (ब) | अङ्गुलीवोरगक्षता । |
| (iii) | अहिंसा सत्यमक्रोधः | (स) | मया पुत्रवती च या । |
| (iv) | ज्ञानोदधिस्तु | (द) | त्यागः शान्तिरपैशुनम् । |

**15.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत ।

(केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखाङ्कित पदों के प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए ।

(केवल चार प्रश्न)

Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box.

(Only four questions) $4 \times \frac{1}{2} = 2$

(i) आचार्याय प्रियं धनम् आहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।

(ii) अजीर्णे भेषजं वारि ।

(iii) सर्वस्य लोचनं शास्त्रम् ।

(iv) आसुरीं यौनिमापन्ना मूढा जन्मनि जन्मनि ।

(v) दिलीप इव राजेन्दुः इन्दुः क्षीरनिधाविव ।

**मञ्जूषा**

| |
|---|
| चन्द्रः, आनीय, नेत्रम्, जलम्, मूर्खाः |

## (II) संस्कृत-साहित्यस्य सामान्यपरिचयः — *10 अङ्काः*
## संस्कृत साहित्य का सामान्य परिचय
## General Introduction to Sanskrit Literature

**16.** पाठ्यपुस्तकम् आधृत्य समुचितस्य रचनायाः कवेः वा अभिधानं लिखत । (केवलं प्रश्नत्रयम्)

पाठ्य-पुस्तक के आधार पर समुचित रचना कवि का नाम लिखिए । (केवल तीन प्रश्न)

Write the appropriate name of the book or the poet.

(Only three questions) $3 \times 1 = 3$

(i) 'रघुवंशम् महाकाव्यम्' इति रचनायाः लेखकः कः ?

(ii) 'मदालसा' पाठः कस्मात् ग्रन्थात् सङ्कलितः ?

(iii) 'मातुराज्ञा गरीयसी' इति पाठः कस्मात् ग्रन्थात् संगृहीतः ?

(iv) 'शिवराजविजयम्' इत्यस्य रचनायाः लेखकः कः ?

**17.** पद्यकाव्य-गद्यकाव्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं मञ्जूषातः चित्वा रिक्तस्थानेषु लिखत । (केवलं प्रश्नत्रयम्)

पद्यकाव्य, गद्यकाव्य एवं चम्पूकाव्य की विधाओं की उपयुक्त विशिष्टता को मंजूषा से चुनकर रिक्तस्थानों में लिखिए । (केवल तीन प्रश्न)

Choose from the box the appropriate characteristics of the genres of epic, prose, poetry and champoo poetry and write them in the blanks.

(Only three questions) *3×1=3*

(i) पद्यकाव्यस्य विशिष्टं तत्त्वं ________ भवति ।

(ii) कादम्बरी ________ अस्ति ।

(iii) ________ काव्यं चम्पूकाव्यं भवति ।

(iv) कथा ________ भेदः अस्ति ।

**मञ्जूषा**

| |
|---|
| गद्यकाव्यस्य, गद्यकाव्यम्, गेयता, गद्यपद्यमयम् । |

**18.** नाट्यतत्त्वानि अधिकृत्य समुचितं मेलनं कुरुत ।

नाट्यतत्त्वों के आधार पर समुचित मिलान कीजिए ।

Make an appropriate comparison on the basis of the elements of Drama. *4×1=4*

| | *'क'* | *'ख'* |
|---|---|---|
| (i) | मञ्चे नाटकस्य प्रस्तुतकर्ता | अभिनयः |
| (ii) | रूपकस्य एव भेदः | भासस्य प्रसिद्धा रचना |
| (iii) | नाट्यस्य प्रमुख तत्त्वम् | नाटकम् |
| (iv) | स्वप्नवासवदत्तम् | सूत्रधारः |